Postal Regd.No. GAMC- 1553/2019-2021
ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १७०
जुलाई - २०२०

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹10

## चिन्तनम्

सतीशः गज्जर्

### मा त्वरस्व मित्र !

भवान् कस्मैचित् दूरवाणीं योजयति । वार्तालापं कर्तुं महती उत्कण्ठा वर्तते, किन्तु पुरतो विद्यमानः जनः प्रवर्तनं (Receive) नैव करोति । एषा घटना पुनः पुनः भवति । एतस्यां स्थितौ ननु त्रिविधः प्रतिकारः भवितुम् अर्हति – १. भवान् चिन्तयति एषः मया सह वार्तालापं कर्तुं न इच्छति । भवतुनाम, सोऽपि भुनक्तु । अहमपि इतः परं कदापि दूरवाणीं न करिष्यामि । एषा कृता मया प्रतिज्ञा । २. भवान् चिन्तयति – इदानीं सः कार्यव्यापृतः स्यात् । सः स्वयं दूरवाणीं कुर्यात् । अहं तु नैव करिष्यामि । ३. भवान् चिन्तयति – निश्चयेन चिन्तायाः विषयः एषः । किं सः आपद्गतः स्यात् ? किं वा विवशः स्यात् ? अहमपि कथं कुशलं ज्ञास्यामि तस्य ? उपायान् चिन्तयामि । सम्पर्कं कर्तुं कथञ्चित् प्रयत्नं करिष्यामि ।

अत्र प्रथमे सोपाने त्वरा, कोपः, अहङ्कारः, हठः, अज्ञानं च पृथग्विधं दृश्यते । द्वितीये सोपाने धैर्यं वर्तते, किन्तु तत्र अहङ्कारः व्यवधानं भूत्वा बाधते । तस्मात् क्रियाप्रवर्तनं लुप्यते । तृतीये सोपाने धैर्यम्, अनुक्रोशः (भावना), साहाय्ये तत्परता, ज्ञानस्य विस्तीर्णः प्रकाशः च दृश्यते ।

एतस्य विचारस्य वयं यथेष्टं विस्तारं कर्तुं शक्नुमः असंख्यकानि उदाहरणानि अपि प्रस्तौतुं शक्नुमः । तत्त्वार्थः तु अयमेव यत् वयं प्रतिपदं धैर्यं हत्वा, त्वरां च आश्रित्य पुरातनान् दृढमूलान् सम्बन्धान् अपि एकेन प्रहारेण चूर्णीकुर्मः । वस्तुतः सम्बन्धः चिरसञ्चितस्य पुण्यस्य प्रतिफलं वर्तते । तद् वयं लघुना अहङ्कारेण कथं नाशयितुम् अर्हामः ?

अथ मम विषये किञ्चित् । दूरदर्शनं दूरवाणी च मम शत्रू । दूरवाण्या वार्तालापं प्रति मम महान् प्राकृतिकः प्रमादः । कदाचित् केचन महानुभावाः अपि अनेन कारणेन ग्लानिम् अनुभवन्ति । तत्रापि सुदीर्घः वार्तालापः तु मम कर्णौ विध्यति । अन्येन क्रियमाणः सुदीर्घः वार्तालापोऽपि मां गुप्तं कोपयति । एतेषु दोषेषु (?) सत्सु अपि अद्य यावत् कोऽपि सम्बन्धः नष्टो न । कारणं किम् ? परिचयः एव कारणम् । परस्परं हृदयं जानीमः चेत् तुच्छा दूरवाणी अस्माकं किं नाशयिष्यति ? दूरवाणी साधनमात्रम् अस्ति इति तत्त्वतः ज्ञातव्यम् । महाकविः भासः सुन्दरं विचारं दत्तवान् । स्मृतिबलेन कथयामि । सः लिखति यत् 'कस्याश्चित् महत्याः घटनायाः बीजं तु लघु एव भवति ।' सत्यमिव । वयमपि तुच्छेषु विषयेषु त्वरमाणाः भगवत्प्रेषितान् पुण्यान् सम्बन्धान् न नाशयेम । एतत् सूत्रम् – 'तिष्ठतु दूरवाणी,फलतु सम्बन्धः ।'

# ग्रामाधिकारी

प्रवीणा

रामपुरीयः भूस्वामी प्रसादः महाधनिकः। पितृपरम्परया तेन प्राप्ता भूमिः यद्यपि अतिविशाला न आसीत्, तथापि स्वस्य बुद्धिमत्तया कुसीदवाणिज्येन च सः प्रभूतं धनं सम्पादितवान् आसीत्। तस्मिन् ग्रामे प्रायः निर्धनाः एव अधिकाः सन्ति। यदा धनस्य आवश्यकता भवति तदा तैः प्रसादः एव आश्रयणीयः भवति स्म। अतः तत्र प्रसादस्य अधिकारः निरङ्कुशः आसीत्। तस्य वचनं तिरस्कर्तुं धैर्यं न आसीत्।

धनम् अधिकारः इत्यादयः मानवस्य स्वभावान् परिवर्तयन्ति इति वयं जानीमः एव। प्रसादस्य विषये एतत् अवितथं जातम्। दिनेषु गतेषु तस्मिन् अहङ्कारः प्रवृद्धः। सः ग्रामस्य जनानाम् आवश्यकतानां पूरणे सर्वथा आदरहीनः जातः। 'ग्रामस्य बालकाः यदि शिक्षणं प्राप्नुयुः तर्हि मम सर्वाधिकारः विनश्येत्' इति चिन्तयन् सः विद्यालयव्यवस्थाविषये उपेक्षां दर्शयति स्म। नूतनः अध्यापकः विद्यालयम् आगच्छति चेत् तं तर्जयित्वा, तस्मिन् भीतिं जनयित्वा वा ततः प्रेषयति स्म सः।

अथ कदाचित् सूरजः नाम कश्चन उत्साही तरुणः अध्यापकः तं ग्रामम् आगतवान्। सः कृष्णापुरनिवासी, प्रसादस्य भगिन्याः पुत्रः च। सः निश्चितवान् यत् मया उपायेन एव मातुलस्य दुराचाराः अन्यायव्यवहाराः च दूरीकरणीयाः इति।

सूरजः भगिनीपुत्रः एव इत्यतः तं पीडयितुं न शक्तवान् प्रसादः। तं गृहम् आनाय्य सः अबोधयत् – "एतस्मिन् कुग्रामे स्थित्या किम् ? भवान् तु सुशिक्षितः। एतस्मिन् ग्रामे अध्यापनं यदि क्रियेत तर्हि दिनानि व्यर्थीकृतानि भवेयुः। भवता कूपमण्डूकेन न भवितव्यम्। नगरे उत्तमम् उद्योगम् अहं दापयिष्यामि" इति।

तदा सूरजः अवदत् – "नगरे अध्यापनाय सुशिक्षिताः जनाः बहवः सज्जाः भवन्ति। किन्तु दूरस्थे कुग्रामे कार्यकरणाय कोऽपि न उत्सहते। अतः एव अत्र आगतं मया ग्रामीणानां शिक्षणाय प्रयासः एव अद्य विशेषतः अपेक्ष्यते" इति।

एतत् श्रुत्वा प्रसादः यद्यपि असन्तुष्टः तथापि ताम् असन्तुष्टिं न प्रकाशितवान् सः।

सूरजः ग्रामजनानां साहाय्येन जीर्णस्य विद्यालयस्य परिष्कारं कारितवान्, बालानां पाठनम् आरब्धवान् च। सायं रात्रौ वा सः वयस्कान् अपि पाठयति स्म। स्वावलम्बिताम् अपि बोधयति स्म सः। सर्वकारतः एतदर्थं कीदृशं साहाय्यं प्राप्तुं शक्यम् इत्यादिकम् अपि ज्ञाप्यते स्म तेन। तस्मात् ग्रामे अल्पे एव काले परिवर्तनम् आरब्धम्।

एतत् प्रसादस्य क्रोधाय जातम्। ग्रामे मद्विषये आदरः क्षीयते इति भीतिः तस्य। सूरजं ग्रामात् प्रेषयितुम् इच्छन् सः कदाचित् सायङ्काले विद्यालयसमीपं गतवान्। तदवसरे सूरजः बालान् बोधयन् आसीत्। तत् बोधनं प्रसादस्य कर्णयोः अपि पतितम्।

"निसर्गे परिवर्तनं सदा भवति अस्माकं हस्तक्षेपं विनैव। किन्तु जीवने परिवर्तनं तु प्रयत्नात् एव भवितुम् अर्हति, न तु सहजतया। यः प्राप्तस्य अवसरस्य उपयोगं चिन्तयति सः विकासं प्राप्तुम् अर्हति। किन्तु एतदर्थं योग्यः परिश्रमः तु करणीयः भवति। ये न परिश्राम्यन्ति ते विकासं प्राप्तुं न अर्हन्ति। यैः प्रगतिः साधिता तैः प्रगतिम् असाधितवताम् उद्धाराय प्रयासः करणीयः। ते उदाराः स्युः। द्वेषासूयादीन् दुर्गुणान् परित्यजेयुः" इति वदन् सूरजः बालान् कर्तव्यं बोधयन् आसीत्।

तस्य कथनं वास्तविकं विवेकपूर्णं च आसीत्। तस्य श्रवणात् प्रसादस्य मनः परिवृत्तं जातम्। सः अग्रे गत्वा सूरजम् अवदत् – ''सूरज! भवान् वयसा अल्पः सन् अपि महामेधावी। मयि विवेकः जागरितः भवता। यानि कार्याणि मया करणीयानि तानि कुर्वन् भवान् एव ग्रामाधिकारी भवितुमर्हः'' इति।

''मातुलवर्य ! भवति यत् परिवर्तनं मया प्रतीक्षितम् आसीत् तत् अद्य सिद्धम्। एतस्य ग्रामस्य अधिकारी भवान् एव। ग्रामीणानाम् आवश्यकतायाः पूर्त्यै कार्यं कुर्वता भवता उत्तमा कीर्तिः प्राप्तव्या। श्वः मया रङ्गपुरं प्रति गम्यते'' इति अवदत् सूरजः।

## दर्पः अकर्तव्यः

व्योम शाहः

पुरा एकस्मिन् देशे कश्चन विद्वान् अवसत्। तेन बहवः ग्रन्थाः टीकाः च विचरिताः। सः ग्रामे ग्रामे अतीव प्रसिद्धः सञ्जातः। जनाः अवदन् यत् ''सः सरस्वत्याः प्रसादं प्राप्तवान्। तेनैव सः इदृशं लिखति'' जनानाम् एतादृशं वचनं श्रुत्वा सः गर्वितः। सः अचिन्तयत् – ''अहं सर्वश्रेष्ठः। न कोऽपि मादृशः।''

एकदा सः यात्रार्थं बहिः गतवान्। सः ज्ञातुम् ऐच्छत् कति जनाः तं जानन्ति इति। सः अदूरस्थं ग्रामम् अगच्छत्। चलन् चलन् मध्याह्नं सञ्जातम्। ग्रीष्मकालः आसीत्। सः तृषार्तः अभवत्। सः निकटस्थात् कूपात् घटे जलं पूरयन्तीं युवतीम् अपश्यत्। सः तां निवेदितवान् – ''आर्ये! अहं तृषितः अस्मि। कृपया मह्यं किञ्चित् जलं ददातु।''

सा उक्तवती – ''अहं भवन्तं न जानामि। प्रथमं परिचयं ददातु, अनन्तरं भवते जलं दास्यामि।'' गर्वितः सः स्वस्य नाम न उक्तवान्। सः अवदत् – ''अहम् अतिथिः।'' युवती पट्वी आसीत्। सा प्रत्युक्तवती – ''संसारे द्वौ एव अतिथी स्तः – एकं धनम् अपरं च यौवनम्।''

ग्रामीण्याः युवत्याः इदृशम् उत्तरम् आकर्ण्य सः विस्मितः। सः उक्तवान् – ''अहं सहिष्णुः वर्ते।''

''एतत् मम प्रश्नस्य उत्तरं नास्ति। संसारे द्वौ सहिष्णू वर्तेते – एका पृथ्वी या अस्माकं भारं सहति। अपरः पादपः। यद्यपि कोऽपि पाषाणं क्षिपति, तथापि सः फलानि ददाति।''

अथ सः विद्वान् चिन्तितवान् – ''अस्याः युवत्याः उत्तराणि न साधारणानि। एषा विदुषी भासते।'' सः उदितवान् – ''अहं हठी अस्मि।''

नास्ति तद् मे प्रश्नस्य उत्तरम्। संसारे द्वौ एव हठिनौ स्तः – ''एकः नखः अपरे च केशाः ये वारं वारं कर्तयन् अपि वर्धन्ते।'' इति अवदत् युवती।

ज्ञानयुक्तं प्रत्युत्तरं श्रुत्वा सः पराभूतः। सः उक्तवान् – ''अहं मूर्खः। कृपया मां क्षमस्व।''

''वस्तुतः अस्मिन् संसारे द्वौ मूर्खौ स्तः। एकः अयोग्यः नृपः यः राज्यं करोति। अपरः मन्त्री यः राजानं मोदितुं अयोग्ये निर्णये प्रशंसां करोति।''

अतीव तृषार्तः सः युवत्याः पादौ धृत्वा जलम् अयाचत। तदैव युवती उक्तवती – ''पुत्र! उत्तिष्ठ।'' सः उपरि दृष्टवान्। वस्तुतः सा सरस्वती देवी आसीत्। सः तत् दृष्ट्वा चकितः।

सः अवदत् ''मातः! प्रणमामि क्षमस्व माम्। अहं मदान्धः अभवम्।''

''पुत्र! त्वं गर्वितः अतः मया त्वां प्रतिबोधयितुम् आगन्तव्यम् आपतितम्। इदानीं कदापि दर्पः मा सेवताम्। शुभं भवेः।'' इति आशीः दत्त्वा सा अन्तर्भूता।

## योगशास्त्रम्

✍ डॉ. सञ्जयकुमारः जोषीः

ब्रह्मज्ञान-आत्मज्ञानप्राप्त्यै विभिन्नाः सिद्धान्ताः सन्ति । सांख्य-योग-न्याय-वेदान्त-मीमांसादयः दार्शनिकाः सिद्धान्ता स्व-स्व दृष्ट्या आत्मज्ञानलाभाय विवेकप्रक्रियाः दर्शयन्ति। तेषु शास्त्रम् अत्यन्तं प्रसिद्धम्। अनेन शास्त्रेण अन्येषु सर्वेषु दर्शनेषु स्वप्रभावः स्थापितोऽस्ति।

गरुडपुराणे वर्णितं यत् दत्तात्रेयः अलर्काय अयम् अष्टाङ्गयोगं अकथयत्। तदनुसारं योगः यथा-

- योगस्य पञ्चयमाः - अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रहम् च।
- योगस्य पञ्चनियमाः - सन्तोषः, तपः, शान्तिः, ईश्वरपूजा, दमः च।
- योगस्य आसनम् - पद्मकादि उक्तम्।
- योगे प्राणायामः मरुत् जयः। प्राणायामः त्रिविधः। (१) पूरकः (२) कुम्भकः (३) रेचकः

तथा च लघ्वादि रूपेणापि त्रिविधः प्राणायामः।

(१) लघु प्राणायामः - द्वादशमात्रः। (२) मध्यमप्राणायामः - चतुर्विंशतिमात्रः । (३) उत्तमप्राणायामः - षट्त्रिंशन्मात्रिकः।

जपध्यानयुतः प्राणायामः सगर्भः कथ्यते। जपध्यानरहितः प्राणायामः - अगर्भः कथ्यते। योगी प्रथम (लघु) प्राणायामेन स्वप्नं जयति। द्वितीय (मध्यम) प्राणायामेन वेपथुः जयति। तृतीय (उत्तम) प्राणायामेन कर्मविपाकं जयति।

प्रत्याहारः -प्रत्याहारः रोधनम्। इन्द्रिय-प्राण-मनादीनां रोधनम् (निग्रहम्)।

ध्यानम् -ब्रह्मचिन्ता। परब्रह्मणः चिन्तनम्। ॐ कार प्रणवोच्चारपूर्वकं चिन्तनम्।

धारणा -मनसः धृतिः। अष्टादशवारं विधिपूर्वकं कृतं प्राणायामं धारणा कथ्यते। धारणा दशधा स्मृता। ताः यथा : - (१) नाड्याम् (२) हृदये (३) उरसि (४) उदरे (५) कण्ठे (६) मुखे (७) नासिकाग्रे (८) नेत्रे (९) भ्रूमध्ये (१०) मूर्धनि - इति।

**समाधिः** - अहं ब्रह्म ईति अवस्थानम्। ब्रह्मणः स्थितिः च। योगी न दुःखी, न रोगी, न बन्धवान्, न पापात्मा तिष्ठति।

योगशास्त्रस्य वैज्ञानिकत्वम्- पूर्वे जनाः मन्यन्ते स्म, यत् योगः सामान्यजनानां कृते नास्ति। अनन्तरं स्पष्टं जातं यत् साम्प्रतम् अति गतियुक्ते चिन्तापूर्णे सर्वेषां जीवने स्वास्थ्यपूर्णं रोगमुक्तं जीवनं जीवितुं योगस्य परमावश्यकता वर्तते। योगशास्त्रम् पूरकचिकित्सारूपेण स्वीक्रियते चिकित्सकैः।

योगः मानवधर्मः वर्तते।

- योगः आत्मविकासविज्ञानमस्ति।
- योगः बाह्य-आन्तरिकसौन्दर्यवर्धकः विद्यते।
- योगः सिद्धिप्राप्त्यै सुष्ठुविज्ञानमस्ति।
- योगः आत्म-परमात्मनोः मेलनम्।
- योगः मानवानां शरीर-प्राण-मनसां पूर्णसंकलितावस्था।
- योगः समताभावः।
- योगः कर्मसु कौशलम्।
- योगः मुखतेजः, शरीरबलं, मनसः उत्साहं, बुद्धेः विकासं वर्धयति।

(क्रमशः...)

## मासवार्ता

### आरब्धः **Value Education through Sanskrit** इति अभ्यासक्रमः ।

बालकाः संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतेः परिचयं प्राप्नुयुः इति लक्ष्यीकृत्य एकलव्य-संस्कृत-एकेडेमीसंस्थाने Value Education through Sanskrit बालसंस्कृतवर्गः इति अभ्यासक्रमः सञ्चाल्यते । अभ्यासक्रमेऽस्मिन् Skg तः ८ कक्ष्यायाः छात्राणां कृते संस्कृतपाठनस्य उत्तमा व्यवस्था कल्पितास्ति । एतेन अभ्यासक्रमेण बालेषु विविधाः क्षमताः तद्यथा उच्चारणशुद्धिः स्मरणशक्तेः विकासः व्यक्तित्वविकासश्च वर्धिष्यते। छात्राः आवर्षं रविवासरे सप्ताहे एकवारं सार्धैकघण्टां यावत् संस्कृतं पठिष्यन्ति । अत्र उल्लेखनीयं यत् कोरोनासङ्क्रमणस्य एतस्मिन् सङ्कटकाले छात्राणाम् अध्ययनम् अवरुद्धं न भवेत् तदर्थम् एकलव्य-संस्कृत-एकेडेमीसंस्थानेन – संस्कृतवर्गाः आरब्धाः सन्ति । डॉ. अमी उपाध्यायः, श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहील, श्रीपारुल व्यासः, श्रीमती माधवी झाला, श्रीश्यामः पटेलः च छात्रान् पाठयिष्यन्ति । एताः सर्वाः एकलव्य-संस्कृत-एकेडेमीसंस्थाने प्रशिक्षिताः उत्तमाः शिक्षिकाः सन्ति।




### आरब्धः पाणिनीसूत्रपाठपाठ्यक्रमः

अहमदाबादनगरे विविधेषु विद्यालयेषु आधुनिकविषयान् पठन्तः छात्राः अस्माकं पारम्परिकं शास्त्रशिक्षणमपि जानीयुः इति विचिन्त्य एकलव्य-संस्कृत-एकेडेमीसंस्थानेन 'पाणिनीयसूत्रपाठः' इति कश्चन पाठ्यक्रमः आरब्धः वर्तते । अभ्यासक्रमेऽस्मिन् एते छात्राः लघुसिद्धान्तकौमुद्याः सूत्राणि कण्ठस्थीकरिष्यन्ति । एतेन छात्राणां स्मरणशक्तेः विकासः, उच्चारणशुद्धिः च भविष्यति । अग्रे यदि एते व्याकरणं पठितुम् इच्छन्ति तर्हि तस्यापि व्यवस्था संस्थानेन कल्पितास्ति।

## कृपया हसन्तु

परीक्षायां प्रश्न: आसीत्, “आह्वानं कथं कर्तुं शक्यते ?” इति ।

एतत् पठित्वा नमन: सम्पूर्णम् उत्तरपत्रं रिक्तं स्थापयित्वा अन्ते अलिखत् - “यदि धैर्यम् अस्ति तर्हि माम् उत्तीर्णं कृत्वा दर्शयतु ।”

आह्वानम् - challenge ★ ★ ★ ★ ★

शिक्षक: - (रमणं प्रति) ‘शास्त्रीयसङ्गीतम्’ एवं च ‘डिस्कोसङ्गीतम्’ इत्यनयो: मध्ये क: भेद: ?

रमण: - महोदय ! उभयो: मध्ये मस्तकात् आरभ्य पादपर्यन्तं भेद: वर्तते ।

शिक्षक: - तत् कथम् ?

रमण: - शास्त्रीयसङ्गीतम् श्रुत्वा जना: मस्तकं चालयन्ति । किन्तु डिस्कोसङ्गीतं श्रुत्वा जना: पादौ चालयन्ति । ★ ★ ★ ★ ★

नमन: - (रमणं प्रति) सर्वप्रकारकेषु रुग्णालयेषु मया चिकित्सायै प्रवेश: स्वीकृत: वर्तते ।

रमण: - अलम् असत्यभाषणेन । किं प्रसुतिगृहेऽपि त्वया प्रवेश: प्राप्त: आसीत् ।

नमन: - भो: मित्र ! तत्र तु मम जन्म अभवत् । तर्हि कथं तत्र मम न प्रवेश: ?

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**दन्तैर्हीन: शिलाभक्षी निर्जीवो बहुभाषक: ।**
**गणास्यूति समृद्धोऽपि परपादेन गच्छति ॥**



दन्ता: न विद्यन्ते चेदपि शिला: खादति । जीव: नास्ति चेदपि बहु सम्भाषणं करोति। बहुभि: गुणै: युक्तश्चेदपि अन्यान् अनुसरति। किं स्यात् ?

**उत्तरम्** – पादरक्षा

**न तस्यादि: न स्यान्तो मध्ये यस्तस्य तिष्ठति ।**
**तवाप्यस्ति ममाप्यस्ति यदि जानासि तद्वद ॥**

प्रथम: अर्थ: – आदि: नास्ति, अन्त्यं नास्ति, मध्ये य: विद्यते तस्य समीपे भवति। मम अपि अस्ति, भवत: अपि अस्ति। जानाति चेत् उत्तरं वदतु।



द्वितीय: अर्थ: – नकार: आदौ अस्ति, नकार: अन्ते विद्यते। मध्ये यकार: विद्यते । तच्च वस्तु मम समीपे अपि विद्यते, भवत: समीपे अपि विद्यते। किं तत् ?

**उत्तरम्** – नयनम्

## ज्ञानसरिता

**महान्तः गोधिकाकुलीयाः जीविनः** – भवन्तः कथापुस्तकादिषु महाकारिकाणां गोधिकानां विषये पठितवन्तः स्युः एव।

कोमोडोनामिकाः गोधिकाः इण्डोनेशियादेशे कोमोडोद्वीपे निवसन्ति । अल्पसङ्ख्यया ताः इण्डोनेशियादेशस्य अन्येषु अपि द्वीपेषु उपलभ्यन्ते । दशसहस्राधिकेभ्यः वर्षेभ्यः पूर्वम् एतादृशाः एव मेगालानियानामकाः जीविनः ओष्ट्रेलियादेशे प्राप्यन्ते स्म । प्रथमजागतिकयुद्धावसरे केनचित् विमानचालकेन कोमोडोगोधिकानाम् अस्तित्वं ज्ञातम् । तासां जिह्वा मुख्यस्य अन्तः बहिः च सञ्चरन्ती आहारस्य ग्रहणे उपकरोति । दीर्घं सुदृढं च पुच्छं शत्रूणां प्रहारे अतिसमर्थम् । कोमोडोजीविनां मुखे सदा रोगाणवः वसन्ति । अतः तैः दष्टस्य जीविनः व्रणस्य तीव्रता अधिका भवति । एतस्य परिणामतः व्रणितः सः जीवी अचिरात् एव प्राणैः वियुक्तः भवति ।

कोमोडोजीविनः तरणे नितरां दक्षाः । स्थानीयभाषायाम् एतेषां नाम 'ओरा' इति । स्थानीयाः एतान् जलमकरान् भावयन्ति । जगति स्थितायां प्राचीनायां गोधिकाजातौ जाताः एते जीविनः प्राचीनतजातितया यथा तथैव आकारेण अपि सर्वान् जीविनः अतिशेरते ।

**ध्वन्युत्पादकाः मीनाः** –यदि गानशब्दस्य निर्वचनं चिन्त्येत तर्हि मत्स्याः गानसमर्थाः न इत्येव सिद्धं भवेत् । किन्तु एतत् तु सत्यं यत् जातिविशेषे जाताः मत्स्याः विशिष्टं किञ्चन ध्वनिम् उत्पादयितुं समर्थाः इति । मेडिटेरियन्समुद्रपरिसरे दृश्यमानः सिरेन्मत्स्यः स्वस्य दन्तान् आघर्षयन् सङ्गीतानुकारिणं ध्वनिम् उत्पादायितुं समर्थः ।

'आनकमत्स्यः' इति तु कस्यचन मत्स्यविशेषस्य नाम । सः आनकध्वनिम् अनुकर्तुं समर्थः इत्यतः एव तत् नाम तस्य । तेन उत्पाद्यमानः सः ध्वनिः तथा उच्च भवति यत् ५० पादोन्नते ऊर्ध्वतले स्थितः अपि धीवरः तं स्पष्टतया श्रोतुम् अर्हति ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **सुमनाः** | अच्छे मन वाला | a good minded |
| **सुरः** | देवता | a god |
| **सुरभिः** | सुगन्ध | sweet smell |
| **सुरा** | शराब | wine |
| **सुवर्णः** | अच्छे रंग की | having a good complexion |
| **सुवर्णम्** | सोना | gold |
| **सुषिरः** | छिद्रों से पूर्ण | full of holes |
| **सुषुप्तिः** | गहरी नींद | profound sleep |
| **सूकरः** | सुअर | a hog |
| **सूनुः** | पुत्र | a son |
| **सूपः** | दाल | cooked pulse |
| **सैकतम्** | रेतीला तट | a sand bank |
| **सैन्धवः** | घोड़ा | a horse |
| **सैन्धवम्** | एक प्रकार का नमक | a kind of salt |
| **सैरन्ध्री** | दासी | a maid - servant |

## किं भवन्तः जानन्ति ?

**१ ) 'दासबोधः' इति ग्रन्थः केन रचितः वर्तते ?**

(क) एकनाथः (ख) तुकारामः (ग) ज्ञानेश्वरः (घ) समर्थरामदासः

**२ ) बुद्धचरितस्य कर्ता कः अस्ति ?**

(क) भासः (ख) जयदेवः (ग) अश्वघोषः (घ) वरदराजाचार्यः

**३ ) गाथासप्तशत्याः कर्ता कः वर्तते ?**

(क) सेनापतिः (ख) जायसी (ग) सातवाहनः (घ) शुद्रकः

**४ ) 'लीलावती' इति प्रसिद्धस्य गणितपुस्तकस्य कर्ता कः अस्ति?**

(क) शङ्कराचार्यः (ख) आर्यभटः (ग) बाणभट्टः (घ) भास्कराचार्यः

**५ ) कवित्तरत्नाकरग्रन्थस्य लेखकः कः वर्तते ?**

(क) भर्तृहरिः (ख) कालिदासः (ग) सेनापतिः (घ) श्रीहर्षः

**६ ) दशकुमारचरितस्य रचयिता कः वर्तते ?**

(क) बाणभट्टः (ख) जायसी (ग) कालिदासः (घ) दण्डी

**७ ) शिवताण्डवस्तोत्रं केन रचितमस्ति ?**

(क) पाणिनिना (ख) विभीषणेन (ग) रावणेन (घ) कालिदासेन

उत्तराणि – (१) घ (२) ग (३) ग (४) घ (५) ग (६) घ (९) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

# स्तोत्रपाठः
# श्रीदुर्गासप्तशती
## ( चण्डीपाठ )

**Date: 02/07/20 to 27/12/20**

**Thursday: 6.30 to 8.00pm**

**Sunday: 10.00 to 11.30am**

**सहयोगशुल्कम् : ₹ 6000/-**

**Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા માંગો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા માંગો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા માંગો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકીર્દિ બનાવવા માંગો છો ?

તો અહીં છે, એક તક **એકલવ્ય સંસ્કૃત એકેડેમી** દ્વારા આયોજીત

# "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી** માન્ય કોર્ષમાં

ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

અભ્યાસક્રમની વિશેષતાઃ

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવિ શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડૉ. મિહિર ઉપાધ્યાય **9824616237**

➤ **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006